दशकुमारचरित पूर्वपीठिका

२५३

२५ पत्राणि

नं. २९३ घ

[illegible]

२५ [illegible]

[illegible]

१८३५ [illegible]

ई.

७२

दश० श्रीगणेशायनमः। ब्रह्मांडछत्रदंडः। शतधृतिभवनांभोरुहोनालदंडः क्षोणीनौकूपदंडः क्षरदमरसरित्पट्टिका
॥१॥ केतुदंडः ज्योतिश्चक्राक्षदंडस्त्रिभुवनविजयस्तंभदंडोंघ्रिदंडः श्रेयस्त्रैविक्रमस्तेवितरतुविबुधद्वेषिणांकालदं
डः॥१॥ अस्तिसमस्तनगरीनिकषायमानाशश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुव्याख्यातरत्नाकरमाहा
त्म्यामगधदेशशेखरीभूतापुष्पपुरीनामनगरी। तत्रवीरभटपटलोत्तरंगतुरंगकुंजरमकरभीषणसकलरिपुगण
कटकजलनिधिमथनमंदरायमानसमुद्दंडभुजदंडमंडनः पुरंदरपुरांगणवनविहरणपरायणगीर्वाणतरुण
गणिकागणजेगीयमानयाऽतिमानयाशरदिंदुकुंदघनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशा
ट्टहासकैलासकाशनीकाशमूर्त्यारचितदिगंतरालपूर्त्याकीर्त्याऽभितः सुरभितः स्वर्लोकशिखरोरुरुचिररत्न
रत्नाकरवेलामेखलावलयितधरणीरमणीसौभाग्यभोगभाग्यवानऽनवरतयागदक्षिणारक्षितशिष्टविशिष्ट
विद्यासंभारभासुरभूसुरनिकरोविरचितारातिसंतापेनप्रतापेनसततंतुलितवियन्मध्यहंसोराजहंसोनामघन राम:
॥१॥

दर्पकंदर्पसौंदर्यसोदर्यहृद्यनिरवद्यरूपो भूपो वभूव तस्य वसुमती नाम सुमती लीलावतीकुलशेखरमणी रमणी वभूव रोषरूक्षे
ण निटिलाक्षेण भस्मीकृतचेतने मकरकेतने तदा भयेनानवद्या वनितेति मत्वा तस्या रोलंबावली केशजालं प्रेमाकरो रज
नीकरो विजितारविंदं वदनं जयध्वजायमानो मीनो जायायुतो ऽक्षियुगलं सकलसैनिकांगवीरो मलयसमीरो निःश्वा
सः पथिकहृद्दलनः करवालः प्रवालश्चाधरविंबं विजयशंखो वंधुरा लावण्यधरा कंधरा पूर्णकुंभौ चक्रवाकानुका
रौ पयोधरौ ज्यायमाने मार्द्वीकसमा । ने विसलते वाहू ईषदुत्फुल्ललीलावतंसकल्हारकोरकौ गंगावर्त्तसनाभिर्नाभि
र्दूरीकृतयोगिमनोरथो जैत्ररथोऽतिघनं जघनं जयस्तंभभूते सौंदर्यभूते विघ्नितयतिजनारंभे रंभे चोरुयुगं आतपत्रस
हस्रपत्रे पादद्वयमस्त्रभूतानि प्रसूनानि तानीतराण्यंगानि च समभूवन्निव विजितामरपुरे पुष्पपुरे निवसतां सानं
तभोगलालिता वसुमती वसुमतीव मगधराजे । न यथा सुखमन्वभावि । तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसित
वर्मनामधेया धीरधिषणावधीरितविवुधाचार्यविचार्यकार्यसाहित्याः कुलामात्यास्त्रयोऽभूवन् । तेषां सितवर्मणः सुम

दश्रा· तिसत्यवर्माणोधर्मपालस्यसुमंत्रसुमित्रकामपालाः पद्मोद्भवस्यसुश्रुतरत्नोद्भवाविति तनयाः समभूवन् तेषुधर्मशीलः
॥२॥ सत्यवर्मासंसारासारतांबुध्वातीर्थयात्राभिलाषीदेशांतरमगमत। विटनटवारनारीपरायणोदुर्विनीतः कामपालोजनका
ग्रजन्मनोः शासनमतिक्रम्यभुवंबभ्राम। रत्नोद्भवोपिवाणिज्यनिपुणतयापारावारतरणमकरोत। इतरेमंत्रिसूनवः पुरं
दरपुरातिथिषुपितृषुयथापूर्वमन्वतिष्ठन्। ततः कदाचिन्नानाविधमहदायुधनैपुण्यरचितागण्यजन्यराजन्यमौलिपालि
निहितनिशितसायकोमगधनायकोमालवेश्वरंप्रत्यग्रसंग्रामघस्मरंसमुत्कटमानसारंप्रतिसहेलंन्यक्कृतजलधिनिर्घो
षाहंकारेणभेरीभांकारेणहठिकाकर्णनाक्रांतभयचंडिमानंदिग्दंतावलवलयंविचूर्णयन्निजभरनमन्मेदिनीभरेणा
यस्तभुजगराजमस्तकबलेनचतुरंगबलेनसंयुतः संग्रामाभिलाषेणरोषेणमहताविष्टोनिर्ययौ। मालवनाथोप्यने
कानेकपयूथसनाथोविग्रहः सविग्रहइवसाग्रहोभिमुखीभयभयोविजगाम। तयोरथरथ्यतुरगखुरक्षुण्णक्षोणी एम:
समुद्भूतेकरिघटाकटस्रवन्मदधाराधौतमूलेनवबल्लभवरणागतदिव्यकन्याजनजवनिकापटमंडलइववियन्नलव्यापि ॥२॥

लेभ्रूलीपटलेदिविवरध्वनिधिक्कृतान्यध्वनिपटहध्वानबधिरिताशेषदिगंतरालेशस्त्राशस्त्रिहस्ताहस्तिपरस्पराभिहतसैन्ये
जन्यमततनि।तत्रचमगधराजःप्रक्षीणसकलसैन्यमंडलेमालवराजंजीवग्राहमभिगृह्यकृपालुतयापुनरपिस्वराज्येप्रतिष्ठा
पयामासततःसरत्नाकरमेखलामिलामनन्यशासनांन्वनशासधेपसतयानारायणंसकललोककारणंनिरंतरमर्च
यामास॥अथकदाचिन्नरेन्द्रमहिषीदेवीदेवेनकल्पवल्लीफलमाहेहीतिप्रभातसमयेसुस्वप्नमवलोकितवतीसात
दात्पितमनोरथपुष्पमेतंगर्भमधत्त॥राजापिसंपन्नमकृताखंडलः॥सुहृन्नृपमंडलंसमाहूयनिजसंपन्मनोरथा
नुरूपंदेव्याःसीमंतोत्सवंव्यधत्त।एकदाहितैःसुहृन्मंत्रिपुरोहितैःसमायांसभायांसभाभ्रांसिंहासनासीनोगुणे
रहीनोललाटतटन्यस्तांजलिनाद्वारपालेनव्यज्ञापि॥देवदेवसंदर्शनलालसमा॥नसःकोपिदेव।नविर॥व्यार्चे
नार्हीयातिद्वारदेशमध्यास्तइति॥तदनुज्ञातेनतेनससंयमीनृपसमीपमनायि॥भूपतिरायांतंतंविलोक्यसम्यक्कृता
ततदीयगृहचारभावोनिखिलमनुचरनिकरंविसृज्यमंत्रिजनसमेतःप्रणमितमेनंमहासममभाषतनातनुतापसेंद्र

र॰श॰
॥३॥
3

शं सापदेशं गमत भवांस्तत्र तत्र भवदपि न ज्ञातं कथयस्वेति तेनाभाषि मस्त्रमणवलिना प्रांजलिना देवशिरसि देवस्याज्ञामादाये
नेनिर्दोषवेषं स्वीकृत्य मालवेन्द्रनगरं प्रविश्य तत्र गूढतरं वर्तमानेन तस्य राज्ञः समस्तमुदन्तजातं विदित्वा प्रत्यागमं मानी मानसा
रः ॥ स्वसेनिकायुध्मन्तां तराणे संपराये भवतः पराजयमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदयो महाकालनिवासिनं काली॥वि
लासिनमनश्वरं महेश्वरं समाराध्य तपःप्रभावसंतुष्टादस्मादेकवीराराति घ्नीं भयदां गदां लब्ध्वात्मानमप्रतिभटं मन्यमानो
महाभिमानो भवन्तमभियोक्तुमुद्युंक्ते। ततः परं देव एव प्रमाणमिति। तदालोच्य निश्चितकृत्यैरमात्यै राजा विज्ञापितो भूत्। दे
वनिरुपायेन दैवसहायेन योद्धुमरातिरायाति। तस्मादस्माकं युद्धं सांप्रतमसांप्रतं। सहसा दुर्गसंश्रयः क्रियतामिति। ते
बहुधा विज्ञापितोप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमनाबभूव। शितिकण्ठदत्तश
क्तिसारो मानसारो मानसारो योद्धुमनसामग्री भूपसामग्रीसमेतोऽक्लेशं मगधदेशं प्रविवेश। तदा तदाकर्ण्य मंत्रिणो राम:
भूमहेन्द्रं मगधेन्द्रं कथंचिदनुनीय रिपुभिरसाध्ये विन्ध्याटवीमध्ये वरोधान्मूलबलरक्षितान्निवेशयामासुः। राजहंसस्तु प्रशान्त ॥३॥

वीतदैन्यसैन्यसमेतस्तोद्यगत्या निर्गत्याधिकरुषं वैद्विषं रुरोध परस्परबद्धवैरयोरेतयोः। शरयोस्तदा लोकनकुतूहलागतग
गनचराश्चर्यकारणे रणे वर्तमाने जयाकांक्षी मालवदेशरक्षी विविधायुधस्थैर्यचर्याचितसमरतुलितामरेश्वरस्य म
गधेश्वरस्य तस्योपरि पुरा पुरारातिदत्तां गदां प्राहिणोत्। निशितशरनिकरैः शकलीकृतापि सा पशुपतिशासनस्यावंध्यतया सू
तं निहत्य रथस्थं राजानं मूर्छितमकार्षीत्। ततो वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाय दैववशात् पुरशरण्यं महारण्यं प्रा
विशन्। मालवनाथो जयलक्ष्मीसनाथो मगधराज्यं। प्राज्यं समाक्रम्य पुष्पपुरमध्यतिष्ठत्। तत्र हेतिततिहतिश्रांता अमा
त्या दैवगत्याऽनुत्क्रांतजीविता निशांतवातक्रांतलसैन्यक्षतिं राज्ञोऽदृश्यत्वं चाकरोर्पाहिष्या शोकसागरमग्ना रमणानु
गमने मतिं व्यधत्त। कल्याणि भूरमणमरणमनिश्चिते किं च दैवज्ञकथितो मथितोद्धतारातिः सार्वभौमोऽभिरामो भविता
सुकुमारः कुमारस्त्वदुदरे वसति। तत्तस्मादद्य तव मरणमनुचितमिति भूषितभाषितैरमात्यपुरोहितैरनुनीयमानतया
क्षणं क्षणहीनया तया तूष्णीमस्थायि। अथार्धरात्रे निद्रानिलीननेत्रे परिजने विजने शोकपारावारमपारमुत्तर्तुमशक्नुवं

दश·
॥४॥
5

तीसेनानिवेशदेशंनिःशब्दलेशंशनैरतिक्रम्ययस्मिन॥रथस्यसंसक्ततयातरणनयनपलायनश्रांतागंतुमक्षमाक्षमापतिर
ण्याःपथ्याकुलाःपूर्वमतिष्ठन।तस्यनिकटवटतरोःशाखायांमृतिरेखायामिववक्रचिहुत्तरीयार्द्धेनवंधनंमृतिसाधनंविरच्यमर्तु
कामावाङ्माधुरीतिरस्कृतकलकंठासाश्रुकंठमलपत॥लावण्योपमितपुष्पसायकमगधनायकभवानेवभाविन्यपिजन्मनि
वल्लभोभवत्विति॥तदाकर्ण्यपनीहारकिरणनिकरसंपर्कलब्धावबोधोऽमागधोगाधरुधिरविस्रवणनष्टचेष्टोदेवीवाक्यमेवनि
श्चित्यानस्तन्वानः।प्रियवचनानिशनैस्तामाह्वयत·सासंभ्रममागत्यामंदहृदयानंदसंफुल्लवदनारविंदातमुपोषि
ताभ्यामिवानिमिषिताभ्यांलोचनाभ्यांसबाष्पविकस्वरेणस्वरेणपुरोहितामात्यजनमुख्येराहूयतेभ्यस्तमदर्शयत॥राजानि
टिलतटचुंबितनिजचरणांबुजैः।प्रशंसितदैवमाहात्म्यैरमात्यैरभाणि·देवरथ्यचयःसारथ्यपगमेरथ्यैरस्मादरण्यमनय
दिति।तत्रनिहतसैनिकग्रामेसंग्रामेमालवपतिनाऽराधितपुरारातिनाप्रहितयागदयाहीनेनताडितोमूर्छामागत्यात्रनि
शांतपवनेनवोधितोऽभवमितिमहीपतिरकथयत॥ततोविरचितमहेनमंत्रिनिवहेनविरचितदैवानुकूल्येनकालेनशिवि

एम:
॥४॥

रमानीयापनीताशेषशात्रव्यो विकसितनिजाननारविंदो राजामहसाविरोपितव्रणोः काशिविरोधिदैवधिक्कृतपुरुषकारोदै
न्यव्याप्ताकारोमगधाधिपतिरधिकाधिरमास्यसंमत्यामदुभाषितयातयावसुमत्यामस्याचकवितयासमबोधि। दे
वसकलस्यभूपालकुलस्यमध्येतेजोवरिष्ठोगरिष्ठोभवाननघवनमध्यंनिवसतीतिजलबुद्बुदसमानाविराजमाना
संपत्तडिद्वितेवसहसैवोदयतिनव्यपतिच। तन्निखिलंदैवायत्तमेवावधार्यकार्यंकिं चपुराहरिश्चंद्ररामचंद्रमु
ख्याअसंख्यामहीन्द्राऐश्वर्येणोपमितमहेन्द्रादैववशंतंतंदुःखमंत्रंसम्यगनुभूयपश्चादनेककालंनिजराज्यमकुर्व
न्॥ तदहंदेवभवान्नविषीदतिकंचनकालंविरचितदैवसमाधिर्गलिताधिस्तिष्ठतुनाचरिति। ततःसकलसैन्यसम
न्वितोराजहंसस्तपोविभ्राजमानंवामदेवनामानंतपोधनंनिजाभिलाषावाप्तिसाधनंजगामतंप्रणम्यतेनकृ
तातिथ्यस्तस्मैकथितकथ्यस्तदाश्रमेदूरीकृतश्रमेकंचनकालमुषित्वानिजराज्याभिलाषीमितभाषीसोमकुला
वतंसोराजहंसोमुनिमभाषत। भगवन्मानसारःप्रबलेनदैवबलेनमांनिर्जित्यमदीयंराज्यमनुभवति। तदहमप्यु

दश॰ ग्रंतपोविरच्यतमरातिमुन्मूलयिष्यामिलोकशरण्येनभवत्कारुण्येनेतिनियमवंतंभवंतंआपृच्छमिति। ततस्त्रिकालज्ञस्त
॥५॥ पोधनोराजानमवोचत्। सखेशरीरकार्श्यकारिणातपसाःलंवसुमतीगर्भस्थः सकलरिपुकुलमर्दनोराजनंदनोनूनं
5 संभविष्यतिकंचनकालंतूष्णीमास्स्वेति॥ गगनवाण्यापिवाण्यासत्यमेतदितितदैवावोचि। राजापिमुनिवाक्यमंगी
कृत्यातिष्ठत्। ततः संपूर्णगर्भदिवसावसुमतीसुमुहूर्तेसकललक्षणलक्षितंसुतमसूत॥ ब्रह्मवर्चसेनतुलितवेधसंपु
रोधसंपुरस्कृत्यकृतविन्महीपतिःकुमारंसुकुमारंजातसंस्कारेणबालालंकारेणचविराजमानंराजवाहननामानंव्य
धत्त। तस्मिन्नेवकालेसुमतिसुमंत्रसुमित्रसुश्रुतानांमंत्रिणांप्रमतिमित्रगुप्तमंत्रगुप्तविश्रुताख्यामहदभिख्याःसू
नवोनवोद्यदिंदुरुचश्चिरायुषःसमजायंत। राजवाहनोमंत्रिपुत्रैरात्ममित्रैःसहबालकेलीरनुभवन्नवर्द्धत कदाचिदेके
नतापसेनरसेनराजलक्षणविराजितंकंचिन्नयनानंदकरंसुकुमारकुमारंराज्ञेसमर्प्यावोचिभूवल्लभकुशसमिदानयना राम:
यवनंगतेनमयाकाचिदशरण्याव्यक्तकार्पण्यमश्रुमुंचंतीयुवतीविलोकिता। निर्जनेचवनेकिंनिमित्तंरुद्यतेत्वयेतिपृष्टासाक ॥५॥

रहेहस्कंधमस्यसमुद्दंष्ट्रामामवोचत । मुनेलावरापजितपुष्पसायके मिथिलानायके कीर्तिव्याप्तसुधर्मणि निजसुहृदो मग
धराजस्य सीमंतिनीसीमंतमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कंचन कालमविवसति समाराधितगिरीशो माल
वाधीशो मगधराजेन योद्धुमभ्यगात ॥ तत्रप्रख्यातयोरेतयोरसंख्ये संख्ये वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति वि
धेये विदेहेश्वरो जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन च विसृष्टो हतावशेषेण भूयिष्ठेन सैन्येन सह स्वपुरगमनम
करोत ॥ ततो वनमार्गेण गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो मूलबलाभिरक्षितावरोधः पला
यिष्ट ॥ तदीययार्भकयोर्यमलयोर्धात्रीभावे परिकल्पिताहं मदुहिता पितीव्रगतिं भूपतिमनुगंतुमक्षमे अभूव । तत्र विवृतवदनः
कोपि रूपी कोप इव व्याघ्रो मामाघ्रातुमागतवान् । भीताहमुत्स्ययाणिरत्वलंती पर्यपतं ॥ मदीयया पाणिभ्रष्टो बालकः कस्या
पि कपिलाशवस्य क्रोडमभ्यलीयत । तच्छवाकर्षिणो मर्षिणो व्याघ्रस्य प्राणान्बाणोबाणासनयंत्रमुक्तोपाहरत ॥ वि
लोलालको बालकोपि शवरैरादाय कुत्रचिदुपानीयत कुमारमपरमुद्वहंती मदुहिता कुत्रगतानजाने । साहं मोहं ग

दश॰ ताकेनापिकृपालुनाहंक्षिपालेनगोपाल्लेनस्वकुटीरमानीयविरोपितव्रणोऽभवं।ततःस्वस्थीभूयभूयःस्वामिभर्तुरंति
॥६॥ कमुपतिष्ठासुरसहायतयादुहितुरनभिज्ञाततयाचव्याकुलीभवामीत्यभिदधानाराकाकिन्यपिस्वामिनंगमिष्यामीति
6 सातद्देवनिरगात्॥अहमपिभवन्मित्रस्यविरहेणानाथस्यविपत्तिमिन्नेविषादमनुभवन्।तदन्वयांकुरंकुमारमन्विष्यन्
तदेकंचंडिकामंदिरंसुंदरमगां।तत्रसंततमेवंविधविजयसिद्धयेकुमारदेवतोपहारंकरिष्यंतःकिराताःमहीरुहशा
खावलंबितमेनमसिलतयावासैकततलेखनननिक्षिप्तचरणंलक्ष्यीकृत्यशितशरनिकरेणवानेकत्वरगैःपलाय
मानंकुक्कुरबालकैर्वादंशयित्वासंहनिष्यामःइतिभाषमाणामयासमभ्यभाष्यंतभोननुकिरातोत्तमाघोरप्रचारे
कांतारेस्खलितपथःस्थविरस्सोऽहंममपुत्रकंकस्यचिच्छायायांविक्षिप्यमार्गान्वेषणायकिंचिदंतरमगच्छं।सकुत्रग
तःकेनवागृहीतःपरीक्ष्यापिनवीक्ष्यते।तन्मुखालोकनेनविनानिकामन्यहान्यतीतानिकिंकरोमिकृपासिभवद्भिर्नकिम राम:
दर्शीतिद्विजोत्तमकश्चिदत्रतिष्ठतिकिमेषतवनंदनःससमेतदेनंगृहाणेत्युक्त्वादैवानुकूल्येनमह्यंतंव्यतरन्।ते ॥६॥

भ्योरन्तराशीर्णोहंबालकमंगीकृत्यशिशिरोदकादिनोपचारेणाश्वास्यनिःशंकंभवदंकमानीतवानस्मि· राजनमारुमंतापि
तरूपोभवानभिरक्षतादिति· राजासुहृदापन्निमित्तंशोकंतन्नंदनवदनविलोकनसुखेनकिंचिदधरीकृत्यतमुपहा
रवर्मनाम्नाहूयराजवाहनमिवपुपोषजनपतिरेकस्मिन्दिवसेतीर्थस्नानायपक्कणनिकटमार्गेणगच्छन्नव
लयाकयाचिदुपलालितमनुपमशरीरंकुमारंकंचिदवलोक्यकुतूहलाकुलस्तामपृच्छत्· भामिनिरुचिरमूर्तिः
राजगुणसंपूर्णोसावर्भकोभवदन्वयसंभवोनभवतिकस्यनयनानंदनोनिमित्तेनकेनभवदधीनोजातः कथ्य
तांयाथातथ्येनत्वयेति· प्रणतयाशबर्यासलीलमलापि· राजन्नात्मपल्लीसमीपेपदव्यांवर्तमानस्यमिथिलेश्वर
स्यसर्वस्वमपहरतिशबरसैन्येमद्दयितेनापहृत्यकुमारएषमह्यमर्पितोव्यवर्द्धत· तदवधार्यकार्यज्ञोराजामुनिकथितंद्विती
यंराजकुमारमेवनिश्चित्यसामदानाभ्यांतामनुनीयापहारवर्मेत्याख्यायदेव्यैवर्द्धयेतिसमर्पितवान्· कदाचिद्वामदेवशि
ष्यः सोमशर्मानामकंचिदेकंबालकंराज्ञः पुरोनिक्षिप्याभाषतदेवरामतीर्थेस्नात्वाप्रत्यागच्छतामयाकाननावनौवनि

दश· तयाकयापिधार्यमाणमेनमुज्वलाकारंविलोक्यसादरमभाणि· स्थविरेकात्वमेतस्मिन्नटवीमध्येवालकमुद्वहंतीकिमर्थमायासेन
७ भ्रमसीतिवृद्धयाप्यभाषिमुनिवरकालयवननाम्निद्वीपेकालगुप्तोनामधनाढ्योवैश्यवरः कश्चिदस्तितन्नंदिनींनयनानंदकारिणीं
7 सुवृत्तांनामैतस्मादागतोमगधनाथमंत्रिसंभवोरत्नोद्भवोनामरमणीयगुणालयोभ्रांतभूवलयोमनोहारीव्यवहारीउपयम्यसु
स्तुस्यपराश्वशुरेणसंमानितोभूत्· कालक्रमेणनतांगीगर्भिणीजाता। ततःसोदरविलोकनकुतूहलेनरत्नोद्भवःकथंचित
श्वशुरमनुनीयचपललोचनयासहप्रवहणमारुह्यपुष्पपुरमभिप्रतस्थे· कल्लोलमालिकाभिहतःपोतःसमुद्रांभस्यमज्ज
त्गर्भभरालसांललनांधात्रीभावेनकल्पिताहंकराभ्यांमुद्वहंतीफलकमेकमधिरुह्यदैवगत्यातीरभूमिमगमंसुहृज्जन
परिवृतोरत्नोद्भवस्तत्रनिमग्नोवाकेनोपायेनतीरमगमद्वानजानामि· क्लेशस्यपरांकाष्ठामधिगतासुवृत्तास्मिन्नटवीम
ध्येसुतमसूत· प्रसववेदनयाविचेतनासाप्रच्छायशीतलेतरुतलेनिवसति· विजनेवनेस्थातुमशक्ततयाजनपदगा
मिनंमार्गमन्वेष्टुमुद्युक्तयामयाविवशायास्तस्याःसमीपेवालकंनिक्षिप्यगंतुमनुचितमितिकुमारोप्यनायीति· एतस्मिन्ने एम:
७

वर्त्मणे वन्यो वारणः कश्चिददृश्यत तं विलोक्य भीता तातं विहाय सा प्राद्रवत्· अहं समीपलतागुल्मं प्रविश्य परीक्षमाणोऽतिष्ठं निपतितं बाल
कं पल्लवकवलमिवाददति गजपतौ कंठीरवो महाग्रहेणान्यपतत्· भयाकुलेन दंतावलेन झटिति वियति पात्यमानो बालको न्यपतत्·
चिरायुष्मतया समुन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलमनीषया परिगृह्य फलेतरतया विततस्कंधमूले निक्षि
प्तोऽभूत्· सोऽपि मर्कटः क्वचिदगात्· बालकेन सत्वसंपन्नतया सकलक्लेशसहेनाभावि· केसरिणा करिणं निहत्य कुत्रचिदगा
मि लतागृहान्निर्गतोऽहमपि तेजःपुंजं बालं शनैरवनीरुहादवतार्य वनांतरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदे
शेन भवन्निकटमानीतवानस्मीति· सर्वेषां सुहृदमिकैरेवानुकूलदैवाभावेन महदाश्चर्यं बिभ्राणो राजा रत्नोद्भवः कथमभवदिति
चिंतयन् तन्नंदनं पुष्पोद्भवनामधेयं विधाय तद्वृत्तं व्याख्याय सुश्रुताय विषादसंतोषावनुभवन् तदनुजतनयं समर्पितवान्· अ
न्येद्युः कंचन बालकमुरसि दधती वसुमतीवल्लभमभिगता तेन कुत्रत्योऽसाविति पृष्टा समभाषत· राजन्नतीतायां रात्रौ काचन दि
व्यवनितामस्पुरतः कुमारकमेकं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताब्रवीत्· देवि त्वन्मंत्रिणो धर्मपालनंदनस्य कामपाल

दश्रा· स्यवल्लभायक्षकांतोहंतारावलीनामनंदिनीमाणिभद्रस्यपक्षेश्वरानुमत्यामहात्मजमेनंभवत्तनूजस्यांभोनिधिवलयवेष्टितक्षोणीमं
८ डलेश्वरस्यभाविनोविशुद्धयशोनिधेराजवाहनस्यपरिचर्याकरणायानीतवत्यस्मित्वमेनंमनोजसंनिभमभिवर्द्धयेति· विस्मयविक
86 सितनयनयामयासविनयासत्कृतासायक्षी· साप्यदृश्यतामयासीदिति· कामपालस्ययक्षकन्यासंगमेविस्मयमानमानसोराज
हंसोरंजितमित्रंसुमित्रमाहूयतदीयभ्रातृपुत्रमर्थपालंविधायतस्मैसर्ववार्तादिकंव्याख्यायादात्· ततःपरस्मिन्दिवसेवामदेवांते
वासीतदाश्रमवासीसमाराधितदेवकीर्तिर्निर्भर्त्सितमारमूर्तिंकुसुमसुकुमारंकुमारमेकमवगमय्यनरपातिमवादीत्· देवती
र्थयात्राप्रसंगेनकावेरीतीरमागतोहंविलोलालकंबालकंनिजोत्संगतलेनिधायरुदतींस्थविरामेकांविलोक्यावोचिषं· स्थ
विरेकात्वमयमर्भकःकस्यनयनानंदकरः कांतारंकिमर्थमागताशोककारणंकिमिति· साकरयुगेनबाष्पजलमुत्सृज्यनिजशो
कशंकूत्पाटनक्षममिवमामवलोक्यशोकहेतुमवोचत् द्विजात्मजराजहंसमंत्रिणःसितवर्मणःकनीयानात्मजःसत्यवर्मातीर् राम·
र्थयात्राभिलाषेणदेशमेनमागच्छत्· सकस्मिंश्चिदग्रहारेकालींनामैकस्यभूसुरस्यनंदिनींविवाह्यतस्याअनपत्यतयागौरीं ८

नामतद्भगिनीं कांचनकांचनकांतिंपरिण्यायतस्यामेकंतनयमलभत॰ कालीमासद्वयमेकदाधनआमध्यासहवालमेनमेकेनमि
षेण अनीयतरिन्यामेतस्यामक्षिपत्करेणैकेनवालमुद्धृत्यापरेणप्लवमानानदीवेगागतस्यकस्यचित्तरोः शाखामवलंब्यत
त्रशिशुंनिधायनदीवेगेनोह्यमानाकेनचित्तरुलयेनकालभोगिनाहमदंशि॰ मद्वलंवीभत्सोऽभूद्धोयमस्मिन्देशेतीरमग
मत॰ गरलस्योद्दीपनतयामपिमतायामरण्येकश्चनशरण्योनास्तीतिमग्नाःशोच्यत इतिततोविषमविषज्वालाकलीठा
वस्थावामाधरणीतलेन्यपतत् इत्याविष्टोहंमंत्रबलेनविषव्यवस्थामपनेतुमक्षमः समीपकुंजेषौषधविशेषमन्विष्य
प्रत्यागतोमुत्क्रांतजीवितांबलोकयातदनुतस्याः पावकसंस्कारंविरच्यशोकाकुलचेताबालमेनमगतिमादायस्वसर्वर्म
हर्म्यंतश्रवणवेलायांतान्निवासाग्रहारनामधेयस्याग्रततयातदन्वेषणमशक्यमित्यालोच्यभवद्मात्यतनयस्यभवानेवाभिर
क्षितेतिभवंतमेनमनयमिति॰ तन्निशम्यमस्यवर्मस्थितेः सम्यगनिश्चिततयाखिन्नमानसोनरपतिः सुमतयेमंत्रिणेसामदत्तं
नामतदनुजतनयमर्पितवान् सोपिसोदरस्यागतमिवमन्यमानोविशेषेणपुपोष॰ एवंमिलितेनकुमारमंडलेनबालकेलीमनु

दशा॰ भवन्नधिरूढानेकवाहनो गजवाहनोऽनुक्रमेण चौलोपनयनादिसंस्कारजातमलभत ततः सकललिपिज्ञानं निखिलदेशीयभाषा
१ पांडित्यं षडंगसहितवेदसमुदायकोविदत्वं काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्मशब्दज्योति
९ स्तर्कमीमांसादिसमस्तशास्त्रचातुर्यं कामंदकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं संगीतसाहित्यहारित्वं मणिमंत्रौषधा
दिमायाप्रपंचचातुर्यं मातंगतुरंगादिवाहनारोहणपाटवं विविधायुधप्रयोगचणत्वं चौर्यदुरोदरादिकपटकलाप्रौढत्वं च तत्तदाचार्ये
भ्यः सम्यक्लब्ध्वा यौवनेन विलसंतं सकलसैन्यसंकुमारनिकरं निरीक्ष्य महीवल्लभः सोऽहं शत्रुजनदुर्जय इति परमानंदममंदमविंदत
इति श्रीदंडिनः कृतौ दशकुमारचरिते कुमारोत्पत्तिर्नाम प्रथम उच्छ्वासः अथैकदा वामदेवः सकलकलाकुशलेन कुसुमसायकसंशयि
तसौंदर्येण कलितसोदर्येण सहसापहसितकुमारेण सुकुमारेण जयध्वजातपवारणकुलिशांकितकरेण कुमारनिकरेण परिवेष्टि
तं राजानमानतशिरसं समभिगम्य तेन तां कृतां परिचर्यामंगीकृत्य निजचरणकमलयुगलमिलन्मधुकरायमाणकाकपक्षं विदलितम एमः
माणविपक्षं कुमारवर्गमालिंग्य मितसत्यवाक्येन विहिताशीरमभाषत भवद्वल्लभभवदीयमनोरथपुण्यमिव समग्रलावण्यं तारुण्यं १

नुतमित्रोभवत्सुनोनुभवति· सहचरसमेतस्यजन्मेतस्यदिग्विजयारंभसमयएषः तदस्यसकलक्लेशसहस्यराजवाहनस्यदिग्विज
यः प्रमाणंक्रियैतामिति· कुमाराभिरामारामाघ्रयोरू घामारामस्मीकृतारयोस्योपहसितसमीरणारणाभिध्यानेनयानेननतेना
प्यदयाशंसंराज्ञानमकार्षुः तन्मात्रिविच्यमितरेषांविधायसमुचितांबुद्धिमुपदिश्यशुभेमुहूर्तेसपरिवारंकुमारंविससर्ज· राजवा
हनोमंगलसूचकंशुभशकुनंविलोकयन्देशंकंचिदतिक्रम्यविंध्याटवीमध्यमविशात्· तत्रहेतिहतिकिणांकंकालाय
सकर्कशकायंयज्ञोपवीतेनानुमेयविप्रभावंव्यक्तकिरातप्रभावंलोचनपरुषंकमपिपुरुषंददर्श· तेनविहितपूजनो
राजवाहनोभ्यभाषतननुमानव· जनसंगरहितेमृगहितेघोरप्रचारेकांतारेविंध्याटवीमध्येभवानेकाकीकिमितिवसति·
भवदंसोपनीतंयज्ञोपवीतंभूसुरभावंघोषयति· हेतिहतिभिः किरातरीतिरनुमीयतेकथयकिमेतदिति· तेजोमयोयंमानु
षमात्रपौरुषोनूनंभवतीतिमत्वासपुरुषलब्धयस्यमुखान्नामजननेविज्ञायतस्मैनिजवृत्तांतमकथयत् राजनंदनकेचि
दस्यामटव्यांवेदशास्त्रविद्याभ्यासमपहायनिजकुलाचारंदूरीकृत्यसत्यशौचादिधर्मव्रतंपरिहृत्यकिल्बिषमन्विष्यंतः पुलिंदपु

दश: रोगमासन्नमुपभुंजानावहवोब्राह्मणब्रुवानिवसंतितेषुकस्यचित्सुतोनिंदापात्रचारित्रोमातंगोनामाहं· सचकिरातबलेनज
१० नपदंप्रविश्यग्रामेषुधनिनः स्त्रीबालसहितानानीयबंधनेनिधायतेषांसकलधनमपहरन्नुद्धतस्ववीतदयोव्यचरंकदाचिदेक
10 स्मिन्कांतारेमदीयसहचरगणेनजिघांस्यमानंभूसुरमेकमवलोक्यदयायत्तचित्तोवोचं· ननुपापानहंतव्योब्राह्मणइति· तेरो
षारुणनयनामांबहुधानिरभर्त्सयन् तेषांभाषणपारुष्यमसहिष्णुरहमवनीसुररक्षणायचिरंप्रयुध्यतैरभिहतोगतजीविता
भवंततः प्रेतपुरीमुपेत्यतत्रदेहधारिभिः पुरुषैः परिवेष्टितंसभामध्येरत्नखचितसिंहासनासीनंशमनंविलोक्यतस्मैदंड
प्रणाममकरवंसोपिमामवेक्ष्यचित्रगुप्तंनामनिजामात्यमाहूयतमवोचत्· सचिवनैषोमृत्युसमयः निंदितचरितोप्य
यंमहीसुरनिमित्तंगतजीवितोभूत् इतःप्रभृतिविगलितकल्मषस्यास्यपुण्यकर्मकरणेरुचिरुदेष्यति· पापिष्ठैरनुभूयमान
मत्रयातनाविशेषंविलोक्यपुनरपिपूर्वशरीरमनेनगम्यतामितिचित्रगुप्तोपितत्रसंतप्तेष्वायसस्तंभेषुबध्यमानान् अत्यु दम:
ष्णीकृतेविततशरावतैलोक्षिप्यमाणान् लगुडैर्जर्जरीकृतावयवान् निशितटंकैः परितक्ष्यमाणानपिदर्शयित्वापुण्यबु १०

द्धिमुपदिश्यमाममुंचत् तदेवपूर्वंचारीरमहंश्रान्तोमहाटवीमध्येशीतलोपचारैरवयतामही स्सुरेणपरीक्ष्यमाणः शिलायां
शायितः क्षणमतिष्ठं तदनुविदितोदंतोमदीयबंधुगणः सहसासमागत्यमंदिरमानीयमामपक्रांतव्रणमकरोत् द्विजन्मा
कृतहोमस्यममक्षरशिक्षांविधायविविधागमतंत्रमाख्यायकल्पवृक्षोपकारंणसदाचारमुपदिश्यहानेक्षणागम्यमान
स्यशशिखंडशेखरस्यपूजाविधानमभिधायपूजांमत्कृतामंगीकृत्यनिरगात् तदारभ्याहंकिरातकृतसंसर्गंबंधुकु
लमुत्सृज्यसकललोकैकगुरुमिंदुकलावतंसंचेतसिस्मरन्नस्मिन्काननेहरीकृतकलंकोवसामि देवभवतेविज्ञापनी
यंरहस्यंकिंचिदस्त्यागम्यतामिति। सचवयस्यगणादपनीयरहसिपुनरेनमभाषत॰ राजन्नतीतेनिशांतेगौरीपतिः
स्वप्नेसंनिहितोनिद्रामुद्रितलोचनंविबोध्यप्रसन्नवदनकांतिः प्रश्रयावनतंमामेवोवाच· मातंगदंडकारण्यांतरालनामिन्यास्मी
रभूमौसिद्धसाध्याराध्यमानस्यस्फटिकलिंगस्यपश्चाददद्रिपतिकन्यापदपंक्तिचिह्नितस्याश्मनः सविधेविधेराननमिवबि
लंविद्यते· तत्रनिक्षिप्तंताम्रशासनंविधातुरिवशासनंसमादायविधिनतदुपदिष्टंदिष्टविजयमिवविधायपातालकाधीश्वरे

दशा· णभवताभवितव्यंभवत्साहाय्यकरोराजकुमारोद्यश्वोवासमागमिष्यतीति· तदादेशानुगुणमेवभवदागमनमभूत्· साधना
११ भिलाषिणोममतोषिणोरवयसाहाय्यमिति· तथेति राजवाहनः साकंमातंगेनसतोनमितोत्ममांगेनविहायार्द्धरात्रेनिद्रा
॥ परंतंचमित्रगणंवनांतरमवाप· तदनुतदनुचराः साकल्येनराजकुमारमनवलोकयंतोविषण्णहृदयास्तेषुवनेषुसम्यगन्विष्या
नवेक्ष्यमाणाएतदन्वेषणमनीषयादेशांतरंचरिष्णवस्त्वनिश्चितपुनः संगमसंकेतस्थानाः परस्परंवियुज्यययुः लोकेक
वीरेणकुमारेणरक्ष्यमाणः संतुष्टांतरंगोमातंगोपिबिलंशशिशेखरकथिताभिज्ञानपरिज्ञातंनिःशंकंप्रविश्यपगृही।
ततान्त्रशासनेनरसातलपथातेनैवोपेत्यतत्रकस्याचित्सदनस्यानेकटकेलेकाननकासारस्याविगतसारसस्यसमीपेनो
नाविधेनशासनविधानोपपादितेनहविषाहोमंविरच्यप्रस्फुरदपारिहारिणिसविस्मयंलोकयतिराजवाहनेस्मभिदा
ज्यसमुज्वलितेज्वलनेपुण्यगेहंदेहंमंत्रपूर्वकमाहुतीकृत्यतडित्समानकांतिदिव्यांतनुमलभत· तदनुमणिमय पू॰भाः
मंडनमंडलमंडितासकललोकललनाकुलललामभूताकन्यकाकाचनविनीतानेकसखीजनानुगम्यमानाक ११

लंहंसगत्याशनैरागत्यावनिसृष्टोऽन्नमायमणिमेकमुपायनीकृत्यतेनकालत्वमितिपप्रासोऽकुंठकलकंठस्वनेनमंदंमंदमुदंजलि
रमाषतमस्सुरोऽहमाहमस्सुरोऽहमनंदिनीकालिंदीनाममममपितास्यलोकस्यशासितामहानुभावोनिजपराक्रमासहि— ना
वि— नाहरीकृतामेरुसमरेयमनगरातिथिरकारितदुर्योगशोकसागरमग्नांमामवेक्ष्यकोऽपिकारुणिकः सिद्धतापसोऽभा
षत· बालेकाश्चिद्दिव्यदेहधारीमानवोनवोवल्लभस्तवभूत्वासकलंरसातलंपालयिष्यतीति· तदादेशंनिशम्यघनश्रा
द्धोन्मुखीचातकीववर्षागमनमिवतदवलोकनकांक्षिणीचिरमतिष्ठमन्मनोरथफलायमानंभवदागमनमवगम्यमद्रा
ज्यावलंबनभूतामासानुमस्यामदनुकृतमार्थ्येनमनसाभवंतमागच्छं· लोकस्यास्यराज्यलक्ष्मीमंगीकृत्यमांतत्सपत्नीं
करोतुभवानिति· मातंगोऽपिराजवाहनानुमस्यातरुणीपरिणीयदिव्यांगनालाभेनहृष्टतरोरसातलराज्यमुररीकृत्यस
परमानंदमाससादवंचयित्वावयस्यगणंसमागतोराजवाहनः तदवलोकनकौतूहलेनभुवंगमिष्णुः कालिंदीदत्तंक्षुत्पिपा
सादिक्लेशनाशनंमणिंसाहाय्यकरणेसंतुष्टान्मातंगाल्लब्धाकंचनाध्वानमनुवर्त्तमानंतंविसृत्यविलपथेनानिर्ययौ· त

दश॰ त्रचमित्रगणमनवलोकमुवंबभ्रामभ्रामंश्चविशालोपशल्येकमप्याक्रीडमासाद्यतत्रविश्रमाभिपुरंदोलिकारूढंरमणीस
१२ हितमाप्तजनपरिवृतमुद्यानेसमागतमेकंपुरुषमपश्यत्· सोपिपरमानंदेनपल्लवितचेताविकसितवदनारविंदोममस्वामीसो
मकुलावतंसोविशुद्धयशोनिधीराजवाहनएषमहाभाग्यतयाऽकांडएवास्यपादमूलंगतवानस्मि। संप्रतिमहान्नयनोत्स
वोजातइतिससंभ्रमंदोलिकायाअवतीर्यसरभसपदविन्यासविलासिहर्षोत्कर्षचरितः त्रिचतुःपदान्युद्गतस्यचरणकम
लयुगलंगलदुल्लसन्मल्लिकावलयेनमौलिनापस्पर्श· प्रमोदाश्रुपूर्णोराजापुलकितांगंतंगाढमालिंग्यअयेसौम्यसोमदत्त
इतिव्याजहार। ततःकस्यापिपुंनागभूरुहस्यछायाशीतलेतलेसंविष्टेनमनुजनाथेनसप्रणयमभाणि· सखेकालमे
तावंतंदेशेकस्मिन्प्रकारेणकेनास्थायिभवतासंप्रतिकुत्रगम्यते· तरुणीकेयमेषपरिजनः संपादितःकथंकथयेति· सो
पिमित्रसंदर्शनव्यतिकरापगतचिंताज्वरातिशयोमुकुलितकरकमलः सविनयमात्मीयप्रचारप्रकारमवोचत् इतिदं एम॰
डिनःकृतौदशकुमारचरितेद्विजोपकृतिर्नामद्वितीयउच्छ्वासः देवभवच्चरणकमलसेवाभिलाषीभ्रमन्नहमेकस्यांवना १२

वने। पिपासाकुलो लतापरिहृतं शीतलेन रसलिलं पिबन्नुत्वसारात्वं तत्रैकमद्राक्षं· तदादाय गत्वा कंचनाध्वानमतिक्रम्य
णेरस्यनुमतया गंतुमक्षमो वने ऽस्मिन्नेव किमपि देवतायतनं प्रविष्टो दीनाननं वृद्धतनयसमेतं स्थविरं महीसुरमेकमवलो
क्य कुशलमुदितदयो ऽहमपृच्छं· कार्पण्यविवर्णवदनो महदाशापूर्णमानसो ऽवोचदयं जन्मा। महाभाग सुता ने तान्मातृही
नाननेकैरुपायैरक्षन्निदानीमस्मिन्कुदेशे ऽभैक्षं संपाद्य दत्तेभ्यो वसामि शिवालये ऽस्मिन्निति· मदेव एतत्कटकाधिप
ती राजा कस्य देशस्य किंनामधेयः किमत्रागमनकारणमस्येति पृष्टो ऽभाषत महीसुरः सौम्य मत्तकालो नाम लाटे
श्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसमानलावण्यं श्रावं श्रावमवधृतदुहितृ
प्रार्थनस्य तस्य नगरीमरौत्सीत्· वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तकालायादात् तरुणीलाभहृष्टचेता
लाटपतिः परिणेया निजपुर एवेति निश्चित्य गच्छन् निजदेशं प्रति मृगयादरेणात्र वने सैन्यवासमकारयत्· कन्यासारेण
नियुक्तो मानपालो नाम वीरकेतुमंत्री मानधनश्चतुरंगबलसमन्वितो ऽन्यत्र रचितशिबिरस्तन्निजनाथावमानखिन्न

र॰त्रा॰ मानसोंतर्विभेदेति॰ विश्रामो वहुतनयो विद्वान्निर्हुतं नस्यविरक्षरानयोग्यइतितस्मैकरुणापूर्णमनाः रत्नमदां॰ परमाह्लादवि
१२ कासिताननोभिहितानेकाशीः कुत्राविदश्यजन्माजेगाम अधश्रमखिन्नेनमयातत्रानिरवेशिनिद्रासुखं॰ तदनुपश्चान्निगलि
13 तवाहुयुगलः सम्भ्रमसुरक्तशाघातविन्हितगात्रोऽनेकनैस्त्रिंशिकानुयातोम्नेयमानप्रसोरस्तुरिसदृशपतत्॰ परिसर्के भू
सुराराजभटारत्नावामिप्रकारंमहुक्रमनाकर्ण्यभयरहितं मांगाढनियम्यरज्जुभिराभ्नीयकारागारमेतेतत्रसखायशांति
निगडिताः कांश्चिन्निर्दिश्यवंतोमामपिनिगडितचरणंशुभमकार्षुः किंकर्तव्यतामूढेननिराशंकेचानुभवनावोविम
या॰ ननुपुरुषाविर्यपरस्वानिमित्तेनकेननिर्विशाप्यकारावासदुःखं इदमस्माकं वयस्याइतिनिर्दिश्यमेतेः किंमित्रामिति॰
तथाविधंमामवेक्ष्यमत्सरान्मयाकृतंलाटपतिहनंतंव्याख्यायचोरवीरः पुनरवोचत् महाभागवीरकेतुमंत्रिणोमान
पालस्यकिंकरावयंतदाज्ञयालाटेश्वरमारणायरात्रौसुरंगद्वारेणतदगारंप्रविश्यतत्रराजाभावेनविषण्णावहुधनमपहृत्य एम॰
महाटवींप्राविशाम अपरेद्युः श्रपदानुसारिणोराजानुचराः वहवोभ्येत्यधृतधनचयानस्मान्परितः परिहृत्यसहठतरवधानिकट १२

मानीयसमस्तवस्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्धायमाणिकाराभनायास्मान्किलाभ्यं खलयन्निति श्रुग
रत्नरत्नालोकनस्थानोहमिदं तदेवमाणिक्यमितिनिश्चित्य समूदेवरानमिमितां दुःखस्यामात्मनोजन्मनामधेयं पुष्पमस्त्वेषण
पर्यटनप्रकारं चाभाष्यसमयोचितैः संलापैर्मैत्रीमकार्षं· ततोऽद्यराजेतेषां मम चक्षं खलावंधनं निर्भिद्यैतैरनुगम्यमा
नोनिद्रितस्य ह्यः स्थगणस्यायुधजातमादायपुररक्षास्सुरतोनिमुखागतान्पटुपराक्रमलीलयाभिद्राव्यमान
पालशिबिरं प्राविशं· मानपालोनिजकिंकरेभ्योमम कुलाभिमानहंत्रींतत्कालीनं विक्रमं च निशम्य मामार्चय
त्· परेद्युर्मंत्रकालेन प्रेषिताः केचन पुरुषाः मानपालमुपेत्य मंत्रिन्मदीपराजमंदिरे सुरंगया वहुधनमपहृत्य सर्वो
रवीराभवस्यैयकटकं प्राविशन्· तानर्पयनोचेन्महाननर्थः संभविष्यतीति ब्रूत ते वाक्यमब्रुवन्· तदाकर्ण्य परोषो रु
णितनेत्रो मंत्रीलाटपतेः कस्तेन मैत्रीका पुनरस्य वराकस्य सेवया किं लभ्यमिति तान्निरभर्त्सयत्· ते मानपालेनोक्तं वि
प्रलापं मत्तकालायतथैवाकथयन्· कुपितोपिलाटपतिर्दीर्घगर्वेणास्यसैन्यकसमेतो योद्धुमभ्यगात्· पूर्वमेव कृतर

दश॰ णनिश्चयोमानपालःसन्नद्धयोधोयुद्धकामोभूत्वानिःशंकंनिरगात॰ अहमपिसबहुमानंमंत्रिदत्तानिचटुलतुरंगमोपेतंचतुरसारथिं
१४ रथंचदूरुह्यतदनुरूपंचापंचविविधबाणपूर्णंतूणीरद्वयंसमुचितान्यायुधानिगृहीत्वायुद्धसन्नद्धोमदीयबलविश्वासेनरिपुद्ध
14 रेणाघुक्तंमंत्रिणामलंगां॰ परस्परमत्सरेणतुमुलसंगरकरमुभयसैन्यमतिक्रम्यसमुल्लसद्भुजाटोपेनबाणवर्षंतदंगेविमुंचन्न
रातीस्वाहरं ततोतिरयतुरंगममरथंतन्निकटंनीत्वाशीघ्रंलघनोपततदीयरथोहमरातेःशिरःकर्तनमकार्षंतस्मिन्ननिपतति
तेतत्स्वत्रिषुसैनिकेषुपलायितेषुनानाविधहयगजादिवस्तुजातमादायपरमानंदसंभ्रतोमंत्रीममानेकविधांसंभावनामकार्षी
त॰मानपालप्रेषितान्मदनुचरादेनमखिलमुदंतमाकर्ण्यसंतुष्टमनाराजाप्युरुतांमदीयपराक्रमेविस्मयमानःसमहोत्सव
ममात्मजांबांधवानुमत्याशुभदिनेनिजतनयांमह्यमदात॰ ततोयौवराज्याभिषिक्तोहमनुदिनेनसुहृज्जनावलोकनफलप्रदे
शंमहाकालनिवासिनःपरमेश्वरस्याराधनायायपत्नीसमेतःसमागतोस्मि॰ भक्तवत्सलस्यगौरीपतेःकारुण्येनभवत्सह एम॰
रविरंसंसर्गेनानंदसंदोहोमयालब्धइति॰ तन्निशम्यानंदितपराक्रमोराजवाहनस्तान्निरपराधदंडदेवमुपालभ्यतस्मैक्रमेणा १४

त्मचरितंकथयामास·तस्मिन्नवसरेपुरतःपुष्पोद्भवंचविलोक्यससंभ्रमंनिजनिटिलतटस्पृष्टचरणांगुलिमुदंजलिममुंगाटमालिं
ग्यानंदवाष्पसंकुलसंफुल्ललोचनःसौम्यसोमदत्तोःयंसपुष्पोद्भवइतितस्मैतंदर्शयामास।तौचचिरविरहदुःखंविसृज्या
न्योन्यालिंगनसुखमन्वभूतांततस्तस्यैवमहीरुहस्यछायायामुपविश्यराजासमभाषतावयस्यभूसुरकार्यंकरिष्यन्नहं
मित्रगणोविदितार्थःसर्वथांतरायंकरिष्यंतीतिनिद्रितान्भवतःपरित्यज्यनिरगां·तदनुप्रबुद्धोवयस्यवर्गःकिमि
तिक्रिस्यमदन्वेषणायकुत्रगतवान्भवानेकाकीक्वगंतेति·सोपिललाटतटचुंबदंजलिपुटःसविनयंसमलपत्
इतिदंडिनःकृतौदशकुमारचरितेसोमदत्तचरितंनामतृतीयउच्छ्वासः·देवमहीसुरोपकारायैवदेवोगतवानितिनिश्चि
त्यापिदेवेनगंतव्यंदेशंनिर्णेतुमशक्नुवानोमित्रगणःपरस्परंवियुज्यदिक्षुदेवमन्वेष्टुमगच्छत्·अहमपिदेवस्यान्वेषणा
यमहीमटन्कदाचिदंबरमध्यगतस्यांबरमणेःकिरणमसहिष्णुरेकस्यागरितटमहीरुहस्यप्रच्छायशीतलेतलेक्षणमुपा
विशं·प्रमपुरोभागेदिनमध्यसमयसंकुचितसर्वावयवांस्वकूर्माकृतिमानुषच्छायांनिरीक्ष्योन्मुखोगगनतलान्महारये

दश· णपतंतंपुरुषमेकंचिरंतरालरावरयोपयनतरुस्योहमवलंब्यशनैरवनितलेनिक्षिप्यदूरापातवीतसंज्ञंतंशिशिरोपचारेणविबो
१५ ध्यशोकातिरेकेणोद्गतबाष्पलोचनंतंभृगुपतनकारणमपृच्छं सोपिकररुहैरश्रुकणानपनयन्नभाषत। सौम्यमगधाधि
15 नाथामात्यस्यपद्मोद्भवस्यात्मसंभवोरत्नोद्भवोनामाहं· वाणिज्यरूपेणकालयवनद्वीपमुपेत्यकामपिवणिक्कन्यकांपरिणी
यतयासहप्रवसागच्छन्नंबुधौतीरस्यानतिदूरएवप्रवहणस्यभग्नतयासर्वेषुनिमग्नेषुकथंकथमपिदैवानुकूल्येननीरन्निधिमभि
गम्यनिजांगनावियोगदुःखार्णवेमग्नमानोहंकस्यापिसिद्धतापसस्यादेशाद्देशेणषोडशहायनानिकथंचिन्नीत्वादुरवस्था
पारमनवेक्षमाणोगिरिपतनमकार्षमितितस्मिन्नेवावसरेकिमपिनारीकूजितमश्रावि· नखलुसमुचितमिदंयत्सि
द्धादेशेपतितनयमिलनेविरहमसहिष्णुर्वैश्वानरंविशसीति। तन्निशम्यममनोविदितजनकभावंतमवादिषंतातभव
तेविलापनीयानिबहूनिसंति· भवतुपश्चादखिलमाख्यातव्यं अधुनानारीकूजितमनुपेक्षणीयंमयाक्षणमात्रमत्रभव
तोस्थीयतामिति· तदनुसोहंत्वरयाकिंचिदंतरमगमं· तत्रपुरतोभयंकरज्वालाकुलहुतभुगवगाहनसाहसिकांमुकुलितां एम: १५

जलिपुटांवनितांकांचित्स्वलोकसंभ्रममनसादर्पनीयकुंजेस्याद्दृष्ट्यासहमायितुरभ्यर्णमभिगमय्यस्थविरामवोचंवदद्भवत्सेकुत्र

त्सेकांतारेनिमित्तेनकेनदुरवस्थामनुभूयतेकथ्यतामितिसासगद्गदमवादीत् पुत्रकालयवनद्वीपेकीलगुप्तनाम्नोवणिजः कस्य

चिद्दुहितास्मिसुहृत्ताननामरत्नोद्भवेन निजकांतेनागच्छंतीजलधौमध्येप्रवहणेनिजधात्र्यामयासहफलकमेकमवलंब्यदैवयोगे

नकूलमुपेता आसन्नप्रसवसमयाकस्यांचिदटव्यामात्मजमसूतममतुमंदभाग्यतयाबालेवनमातंगेनगृहीतेमत्कद्वितीयापरिभ्र

मंतीषोडशवर्षानंतरंभर्तृपुत्रसंगमोभविष्यतीतिसिद्धवाक्यविश्वासादेकस्मिन्पुण्याश्रमेतावंतंसमयंनीत्वाशोकमपारंसोढुमक्ष

मासमुत्वलितेवैश्वानरेशरीरमाहुतीकर्तुमुद्युक्तासीदिति· तदाकर्ण्यनिजजननींतांत्वातामहंदंडवत्प्रणम्यतस्यैमद्वृत्तमखि

लमाख्यायधात्रीभावणफुल्लवदनंविस्मयविकसिताक्षंजनकमदर्शयंपितरौतौसाभिज्ञानमनोन्यंज्ञात्वामुदितौतातरात्मानौवि

नीतेमामानंदाश्रुवर्षेणाभिषिच्यगाढमाश्लिष्यशिरस्युपाघ्रायकस्यांचित्महीरुहच्छायामुपाविशतांकथंनिवसतिमहीवल्ल

भोराजहंसइतिजनकेनपृष्टोहंतस्यराज्यच्युतिंत्वदीयजननंसंकलकुमारावाप्तिंनवदिग्विजययारंभंभवतोमातंगानुयानमस्मा

दश:
१६
16

कंयुष्मदन्वेषणकारणंसकलमभ्यधां ततस्तल्लोकस्यविदाश्रमेमुनेरस्थापयंततोदेवस्यान्वेषणपरायणोहमखिलकार्यनिमित्तंवित्तंनिश्चित्य
भवदनुग्रहाल्लब्धस्यसाधकस्यसाहाय्यकरणदक्षंशिष्यगणंनिःपाद्यविंध्यवनमध्येपुरातनपट्टनस्थानान्युपेत्यविविधनिधिसूचकानां
महीरुहाणामधोनिक्षिप्तान्वसुपूर्णान्कलशान्सिद्धांजनेनज्ञात्वातान्रक्षिषुपरितःस्थितेषुखननसाधनेनसाधयन्दीनारानसंख्यान्राशी
कृत्यतत्कालागतमनतिदूरेनिवेशितंवणिक्कटकंकंचिदभ्येत्यतत्रबलिनोबलीवर्दान्गोणीश्चक्रीत्वातान्यन्यपण्यमिषेणवसुतद्गोणीसंवि
तंतैरुह्यमानंशनैःकटकमनयंतदधिकारिणाचंद्रपालेनकेनचिद्वणिक्पुत्रेणविरचितसौहृदोहममुनैवसाकमुज्जयिनीमुपावि
क्षं· मत्पितरावपितांपुतांपुरीमभिगमय्यसकलगुणनिलयेनबंधुपालनाम्नाचंद्रपालजनकेननीयमानोमालवनाथदर्शनंविधाय
तदनुमत्यामत्रवसतिमकरवं: ततःकाननभूमिषुभवंतमन्वेष्टुमुद्युक्तंमांपरममित्रंबंधुपालोनिशम्यावदत्· सकलंधरणीतलमपा
रमन्वेष्टुमक्षमोभवान्मनोग्लानिंविहायतूष्णींतिष्ठतुभवन्नायकालोकनकारणंशुभशकुनंनिरीक्ष्यकथयिष्यामीतितद्वपिता राम:
मताश्वसितहृदयोहमनुदिनंतदुपकंठवर्तीकदाचिदिंदुमुखींनवयौवनालीढावयवांनयनचंद्रिकांनामतरुणीरत्नंवणिक्मंदिरल १६

क्ष्मीमूर्त्तिमवलोक्य तदीयलावण्यावधूतधीरभावो लतांतबाणबाणलक्ष्यतामयासिषं। चकितबालकुरंगलोचना सापि कुसुम
सायकसायकायमानेन कटाक्षवीक्षणेन मामसकृन्निरीक्ष्य मंदमारुतांदोलिता लतेवाकंपत· मनसाभिमुखैः समाकुंचितै
रागलज्जांतरालवर्त्तिभिः सांगवर्त्तिभिरीक्षणविशेषैर्निजमनोवृत्तिमकथयत् चतुरगूढचेष्टाभिरस्या मनोनुरागं सम्यग्ज्ञात्वा
सुखसंगमोपायमचिंतयं· अन्यदा बंधुपालः शकुनैर्भवद्गतिं प्रेक्षिष्यमाणः पुरोपांतविहारवनं मया सहोपेत्य कस्मिंश्चिन्मही
रुहे शाकुंतवचनानि शृण्वन्नतिष्ठत् अहमुत्कलिकाविनोदपरायणो वनांते परिभ्रमन्सरोवरतीरे चिंताक्रांतचित्तां दीनव
दनां मन्मनोरथैकभूमिं बालचंद्रिकामवलोकयं तस्याः ससंभ्रमप्रेमलज्जाकौतुकमनोरमं लीलाविलोकनसुखमनुभव
न्सुदत्या वदनारविंदे विषण्णभावं मदनकदनखेदानुभूतं तालावान्तत्रिमित्रहास्यलीलया तदुपकंठमुपेत्यावोचिषं· सुमुखि
तव मुखारविंदस्य दैन्यकारणं कथयेति· सा रहस्यसंजातविश्रंभतया विहाय लज्जाभये शनैरभाषत· सौम्य मानसारो मालवाधी
शो वार्द्धकस्य प्रबलतया निजनंदनं दर्पसारमुज्जयिन्यामभ्यषिंचत· स कुमारः सप्तसागरपर्यंतमहीमंडलं पालयिष्यन्निज

दशः पैतृष्वस्रेयावुद्दंडकर्माणो चर्मवर्मदारुवर्माणो धरणीभरणे नियुज्य तपश्चरणाय राजगिरिमभ्यगात्· राज्यं सर्वमसपत्नं शासत्रिव
१८ र्मवर्मणि दारुवर्मा मातुलाग्रजन्मनोः शासनमतिक्रम्य पारदार्यपरद्रव्यापहरणादिदु· कर्म कुर्वाणो मन्मथसमानस्य भवतो लावण्या
17 पायत्तचित्तां मामेकदा विलोक्य कन्यादूषणदोषं दूरीकृत्य बलात्कारेण रंतुमुद्युंक्ते· तच्चिंतया दैन्यमगच्छमिति तस्या मनोगतं मयि
रागोद्रेकं मन्मनोरथसिद्ध्यंतरायं च निशम्य बाष्पपूर्णलोचनामाश्वास्य दारुवर्मणो मारणोपायं च विचार्य वल्लभामवोचं· तरुणि म
वदभिलाषिणं दुष्टहृदयमेनं निहंतुमदुरुपायः कश्चिन्मया चिंत्यते· यक्षः कश्चिदधिष्ठाय बालचंद्रिकां निवसति तदाकारसंपदा
शाभ्यं स्खलितहृदयो यः संबंधयोग्यः साहसिको रतिमंदिरे तं यक्षं निर्जित्य तयैकसखीसमेतया मृगाक्ष्या संलापामृतसुखमनु
भूय कुशली निर्गमिष्यति· तेन चक्रवाकसंज्ञया कारययोधराविवाहनीयेति सिद्धेनैकेनावादीति पुरजनस्य पुरतो भवदीयैः सस
वाचैरसह कथनीयं· तदनु दारुवर्मा वाक्यानीत्थंविधानि श्रावं श्रावं तं यक्षं परिभिया स्यास्यतीति तर्हि वरं यदि वा दौर्जन्येन त्वया संग
मंगीकरिष्यतीति तदा समभवदीयैरित्थं वाच्यः सौम्य दर्पसारवसुधाधिपामात्यस्य भवतोस्मिन्निवासे साहसकरणमनुचितं । पौरजन दशः १८

साक्षिकंभवन्मंदिरमानीतयानयातोयज्ञाख्यासहक्रीडन्नायुष्मान्यदिभविष्यतितदापरिणीयतस्यांमनोरथान्निर्विशेति: सोप्यतदंगीक
रिष्यतित्वंसखीवेषधारिणामयासहतस्यामंदिरंगच्छ अहमेकांतनिकेतनेमुष्टिजानुपदाद्यैस्तंरभसान्निहत्यपुनरपिसख्या
मिषेणभवतीमनुनि:शंकंनिर्गमिष्यामितदेनमुपायमंगीकृत्यविगतसाध्वसलज्जाभवजनकजननीसहोदराणांपुरतआवयो:
प्रेमातिशयमाख्यायसर्वथास्मत्परिणयकारणेतानननुनये: तेपिवंशसंपल्लावण्याढ्यायमह्यमेनमस्यंतोदास्यस्येवदारुवर्म
णोमरणोपायंतेभ्य: कथयित्वातेषामुत्तरमाख्येयंमह्यमिति: सापिकिंचिदुत्फुल्लसरसिजाननामामब्रवीत्: सुभगक्रू
रकर्माणंदारुवर्माणंभवानेवहंतुमर्हति: तस्मिन्हतेसर्वथायुष्मन्मनोरथ:फलिष्यति: एवंक्रियतांभवदुक्तंसर्वमहमपि
तथाकरिष्यइतिमामसकृद्विवृत्तवदनाविलोकयंतीमंदमगारमगात्: अहमपिबंधुपालमुपेत्यशाकुनज्ञात्तस्मात्त्रिरा
त्रदिवसानंतरमेवभवत्संग:संभविष्यतीत्यश्रृणवंतदनुमदनुगम्यमानोबंधुपालोनिजावासंप्रविश्यमामपिनिलयायविस
सर्ज: मन्मायोपायवागुरापाशलग्नेनदारुवर्मणारतिमंदिरेरंतुंसमाहूताबालचंद्रिकातंगमिष्यतीइतिकामन्निकटमभिप्र

द·कु· षितवती॥ अहमपिमणिनूपुरमेखलाकंकणकटकताटंकहारक्षौमकज्जलंवनितायोग्यंमंडनजातंनिपुणतयातत्तत्स्थानेषुनिक्षिप्य
१८ सम्यगंगीकृतमनोज्ञवेषोद्भ्रमयातयासहतदागारद्वारोपांतमगच्छं द्वाःस्थकथितास्मदागमनेनसादरंविहिताभ्युत्थानेनतेनद्वारोपां
18 तनिवारिताशेषपरिवारेणमदन्विताबालचंद्रिकासंकेतागारमनीयत। नगरव्याकुलापक्षकथांपरीक्षित्रागरिकजनोपिकुतूहले
नदारुवर्मणःप्रतीहारभूमिमगमत्· विवेकशून्यमतिरसौरागातिरेकेणरत्नखचितहेमपर्यंकेहंसतूलगर्भशयनमानीयतरु
णीजनस्येमसंततमिस्त्रासम्यगनवलोकितपुंभावांस्यमनोरमस्त्रीवेषायचचामीकरमयमंडनानिसूक्ष्माणिचित्रवस्त्राणिकस्तू
रिकामिलितहरिचंदनंकर्पूरसहितंतांबूलंसुरभीणिकुसुमानिसलालितंवस्तुजातंसमर्प्यमुहूर्तद्वयमात्रंहासवचनैःसंलपन्न
तिष्ठत्· ततोरागांधतयासुमुखीकचग्रहणेमतिंव्यधत्तरोषारुणितोहमेनंपर्यंकतलान्निःशंकोनिपात्यमुष्टिजानुपदाघा
तैःप्राहरं· नियुद्धरभससविकलमलंकारंपूर्ववदुन्मीलयित्वाभयकंपितांनतांगीमुपलाल्यापन्न मंदिरांगणमुपेतःसाध्वसकं रामः
पितद्ववोच्चैरकूजं हाबालचंद्रिकाधिष्ठितेनघोराकारेणयक्षेणदारुवर्मानिहन्यते· सहसासमागच्छतपश्यतेति· तदाकर्ण्यपमि १८

तुताजनाः समुघद्वाष्पाहाहानिनादेनदिशोबधिरयंतोबालचंद्रिकामहितंयक्षंबलवंतंम्रएअपिदारुचर्मामदांधस्तामेवायाच
ततदसौस्वकीयेनकर्मणानिहतः किमस्यविलापेनेतियोलयंतः प्राविशन्ः कोलाहलेतस्मिन्चटुललोचनयासहेनेपुष्प
नसहस्रानिर्गतोनिजावासमगां। ततोगतेषुकतिपयदिनेषुपौजनसमक्षंसिद्धादेशप्रकारेणविवाह्यतामिंदुमुखींपूर्वसंकल्पिता
निस्मृतविशेषाणिंयथेच्छमन्वभवंधुपालशकुननिर्दिष्टेदिवसेस्मिन्निर्गत्यपुराद्बहिर्मानोनेत्रोत्सवकारिभवदवलोकनसुखमनु
भवामीति एवंमित्रवृत्तांतंनिशम्याम्लानमानसोराजवाहनः स्वस्यचसोमदत्तस्यचवृत्तांतमस्मैनिवेद्यसोमदत्तंमहाकाले
श्वराराधनानंतरंभवद्वल्लभासपरिवारोनिजकटकंप्रापय्यागच्छेतिनियुज्यपुष्पोद्भवेनसेव्यमानोभूस्वर्गायमानमवंति
कापुरींविवेश। तत्रायंममस्वामिकुमारइतिबंधुपालादयेबंधुजनायकथयित्वातेनराजवाहनायवसुविधासपर्याकारयन्सक
लकुशलोमहीसुरइतिपुरिप्रकटयनपुष्पोद्भवोमुष्यराहोमज्जनभोजनादिकमनुदिनंस्वमंदिरेकारयामासः इतिश्रीदंडिनःकृ
तौदसस्यमन्मथानलमुत्सलयनसहकारकिसलाशकुमारचरितेपुष्पोद्भवचरितंनामचतुर्थउच्छ्वासः अथमीनकेतनसेना

द.चा. नामकेनमलयगिरिमहीरुहनिरंतरवासिभुजंगभुक्तावशिष्टेनेवतत्क्षणमधृतहरिचंदनपरिमलभरेणेवमंदगतिनादक्षिणानिलेनवियोगि
१९ हृदयस्थंमन्मथानलमुज्वलयनसहकारकिसलयमकरंदास्वादनरक्तकंठानांमधुकरकलकंठानांकाकलीकलकलेनदिक्कुंज
19 मंवाचालयनमानिनीमानसोत्कलिकामुपनयनमाकंदसिंदुवाररक्ताशोककिंशुकतिलकेषुकलिकामुपपादयनमदनमहो
त्सवायरसिकमनांसिसमुल्लासयनवसंतसमयः समाजगाम· तस्मिन्नतिरमणीयेकाले॰ वंतिसुंदरीनाममानसारनंदिनी
प्रियवयस्ययाबालचंद्रिकयासहनगरोपांतरम्योद्यानेविहारोत्कंठयापौरसुंदरीसमवायसमन्विताकस्यचिच्चूतपोतक
स्यछायाशीतलेसैकततलेगंधकुसुमहरिद्राक्षतचीनांबरादिनानाविधेनपरिमलद्रव्यनिकरेणमनोभवमर्चयंतीरेमेत
त्ररतिप्रतिकृतिमवंतिसुंदरींद्रष्टुकामः कामइववसंतसहायःपुष्पोद्भवसमन्वितोराजवाहनस्तदुपवनंप्रविश्यतत्रतत्र
मलयमारुतांदोलितशाखानिरंतरसमुद्भिन्नकिसलयकुसुमफलसमुल्लासितेषुरसालतरुषुकोकिलकीरालिमधुकरा एम:
णामालापान श्रावंश्रावंविकसितेंदीवरकह्लारकैरवराजीवराजिकेलिलोलकलहंससारसकारंडवचक्रवाकचक्रवालक १९

भवव्याकुलाविमलशीतलसलिललालितानिसरांसिदर्शंदर्शममंदलीलयाललनासमीपमवापाबालचंद्रिकयानिः शंकमित
आगम्यतामितिहस्तसंज्ञयासमाहूतोनिजतेजोजितपुरुहूतोराजवाहनः कृशोदर्याः वंतिसुंदर्याअंतिकंजगाम· याच
स्तंसहायेनसमुत्सुकतयारतेः केलीशालभंजिकाविधित्सयाकंचननारीविशेषंविरच्यात्मनः क्रीडाकासारशारदारविंदं
सौंदर्येणपादद्वयमुद्यानवनदीर्घिकामत्तमरालिकागमनरीत्यालीलालसगतिविलासंतूणीरलावण्येनजंघेलीलामंदिर
द्वारकदलीलालित्येनमनोज्ञमूरुयुगंजैत्ररथचातुर्येणघनंजघनंकिंचिद्विकसल्लीलावतंसकह्लारकोरककोटरानुवृत्त्या
गंगावर्त्तसनाभिंनाभिंसौधारोहणपरिपाट्यावलित्रयंमौर्वीमधुकरपंक्तिनीलिमलीलयारोमावलिंपूर्णसुवर्णकलशशोभयाकु
चद्वंद्वंलतामंडपसौकुमार्येणबाहूजयशंखाभिख्ययाकंठंकामिकर्णपूरसहकारपल्लवरागेणप्रतिबिंबीकृतबिंबंरदनच्छदंबा
णायमानपुष्पलावण्येनशुचिस्मितं अग्रदूतिकाकलकंठिकाकलालापमाधुर्येणवचनजातंसकलसैनिकनायकमलय
मारुतसौरभ्येणनिश्वासपवनंजयध्वजमीनद्वयेनलोचनयुगलंचापयष्टिश्रियाभ्रूलतेप्रथमसुहृदः सुधाकरस्यापनीतकलं

दश॰ कयाकांत्यावदनंलीलामयूरबर्हभंग्याकेशपाशंचविधायसमस्तमकरंदकस्तूरिकासंमितेनमलयजरसेनप्रक्षाल्यकर्पूरपरागेणसंम
२० ज्यनिर्मितेवराजसामूर्त्तिमतीवलक्ष्मीमालवेशकन्यकास्वैनैवाराध्यमानंसंकल्पितवरप्रदानायाविर्भूतंमूर्त्तिमंतंमन्मथमिवतमा
40 लोक्यमंदमारुतांदोलितालतेवमदनावेशवतीचकंपेतदनुक्रीडाविश्रंभान्निवृत्तालज्जयाकानिकान्यपिभावांतराणिव्यधत्त॰ ल
लनाजनंसृजताविधात्रानूनमेषाघुणाक्षरन्यायेननिर्मिता॰ नोचेदब्जभूरेवंविधनिर्माणनिपुणोयदिस्यात्तत्समानलावण्याम
न्यांतरुणींकिंनकरोतीतिसविस्मयानुरागंविलोकयतस्तस्यसमक्षंसख्यानुलज्जितासाकिंचित्सखीजनांतरितगात्रातन्नयनाभि
मुखैःकिंचिदाकुंचितैरंचितभ्रूलतैरपांगवीक्षितैरात्मनःकुरंगस्यानायमाआनायःपुंसिजालंस्यातनलावण्यंराजवाहनंविलो
कयंत्यतिष्ठत॰ सोपितस्यास्तदोत्पादितभावरसानांसामग्र्यालब्धबलस्यचविषमशरस्यशरव्यायमानमानसोबभूव। सोमन
सास्यमचिंतयत् अनन्यसाधारणसौंदर्येणानेनकस्यांपुरिभाग्यवतीनांलोचनोत्सवःक्रियते॰ पुत्ररत्नेनामुनापुरंध्रीणांपुत्रव एम॰
तीनांसीमंतिनीनांकानामसीमंतमौक्तिकंक्रियते॰कास्यदेवीकिमत्राकारणकारणमस्यमन्मथोमामपहसितनिजलावण्यमेनं २०

विलोकयंतीमसूययेवातिमात्रंमथ्नन्निजनामसान्वयंकरोतिकिंकरोमिकथमयंत्रातव्यइति॰ ततोबालचंद्रिकातयोरंतरंगवृत्तिंभाववि
वेकेर्हालावाकांतासमाजसंनिधौराजनंदनोदंतस्यसम्यगाख्यानमनुचितमितिलोकसाधारणैर्वाक्यैरभाषतभर्तृदारिकेयंसकलकला
प्रवीणादेवतासांनिध्यकरणआहवनिपुणोभूसुरकुमारोमणिमंत्रौषधज्ञः परिचर्यार्होभवत्यापूज्यतामिति॰ तदाकर्ण्यनिजम
नोरथमनुवदंत्याबालचंद्रिकयासंतुष्टांतरंगातरंगावलीमंदानिलेनेवसंकल्पजेनाकुलीकृताराजकन्याजितमारकुमारंसमु
चितासनासीनंविधायसखीहस्तेनशालेनगंधकुसुमाक्षतघनसारतांबूलादिनानानावस्तुनिचयेनपूजांतस्मैकारयामास॰रा
जवाहनोप्येवमचिंतयत्तयानिर्व्याजोतिस्मरस्वभाववयोः समानमेवतथापिकासजनितविशेषश्चकैर्वाक्यैरस्याज्ञानमुत्सादयि
ष्यामि॰ तस्मिन्नेवसमयेकोपिमनोरमोराजहंसः केलीविधित्सयातदुपकंठमगमत् समुत्सुकयाराजकन्ययामरालस्यग्रहणे
नियुक्तांबालचंद्रिकामवलोक्यसमुचितोवाक्यावसरइतिसंभाषणनिपुणोराजवाहनः सलीलमलपत् सखिपुरासां एम:
बोनामकश्चिन्महीवल्लभोमनोवल्लभयासहविहारवांछयाकमलाकरमवाप्यतत्रकोकनदकदंबसमीपेनिद्राधीनमानसंरा

दशाः २१ जहंसंज्ञानैर्गृहीत्वाविसगुणेनतस्यचरणयुगलंनिगडयित्वाकांतामुखंसानुरागंविलोकयन्मंदस्मितविकासितैककपोलमंडलला
मभाषतरंडुमुखिमयाबद्धोमरालः शांतोमुनिवदास्तेस्वेच्छयानेनगम्यतामिति· सोपिराजहंसः शापमशपत्· महीपालपदस्मि
41 न्नेवजमखंडेनुष्ठानपरायणतयापरमानंदेनतिष्ठंतंनैष्ठिकंमामकारणराज्यगर्वेणावमानितवानसितदेतस्याप्यनारमणीविरहसंता
पमनुभवेति· विषण्णवदनः सांबोजीवितेश्वरीविरहमसहिष्णुर्भूमौदंडवत्प्रणम्यसविनयमभाषत महाभागयदज्ञानादेनेवौकरवंतत्
क्षमस्वेति· सतापसः करुणाकृष्टचेतास्तमवदत्· राजन्निहजन्मनिभवतः शापफलाभावोभवतु· मद्वचनस्यामोघतयाभाविनि
जननेश्वरीशांतरगतायाअस्याः सरसिजाक्ष्यारसेनमुहूर्त्तद्वयमस्यचरणयुगलबंधनकारितयामासद्वयंश्रृंखलानिगलितचरणो
रमणीवियोगविषादमनुभूयपश्चादनेककालंवल्लभयासहराज्यसुखमलभस्वेति तदनुजातिस्मरत्वमपितयोरनुग्रहात् तस्मान्म
रालबंधनंनकरणीयंत्वयेति· सापिभर्त्तुर्दारिकातद्वचनाकर्णनाभिज्ञातस्वपुरातनजननवृत्तांतातमर्थंमस्याणवल्लभरतिमनसिजा एमः
नतीरागपल्लवितमानसासमंदहासमवोचत्· सौम्यपुराशांबोयंतत्वतीसंदेशापरिपालनायतथाविधंहंसबंधनमकार्षीत् तथाहिलोकेपठि २१

ताअपिदाक्षिण्येनाकार्यंकुर्वंतीति कन्याकुमारावन्योन्यपुरातननामधेयपरिचितेः परस्परत्तानायसाभिन्नमुत्कांमनोनुराग
पूर्यमाणमानसोवभूवतुः तस्मिन्नेवावसानेमालचंद्रमाहिषीपरिजनपरिहृताहृहितकेलीविलोकनायंतदेशमवाप· बालचंद्रिका
तुतांविलोक्यससंभ्रमंरहस्यनिर्भेदभियाहस्तसंज्ञयापुष्पोद्भवसेव्यमानंराजवाहनंवृक्षवाटिकांतरितगात्रमकरोत· सामानसा
रमहिषीसखीसमेतायादुहितुर्नानाविधांविहारलीलामनुभवंतीक्षणंस्थित्वानिजागारगमनायोद्युक्ताबभूवमातरमनुगच्छ
त्यवंतिसुंदरीराजहंसकुलतिलकविहारवांछयाकेलीवनेमदंतिकमागतंभवंतमकांडएवविसृज्यमयासमुचितामितिजननम्
न्यनुगमनंक्रियतेतदनेनभवन्मनोनुरागोन्यथामाभूदितिमरालमिवकुमारमुद्दिश्यसमुचितालापकलापंवदंतीपुनः परिवृ
त्तदीननयनावदनंविलोकयंतीनिजमंदिरमगात् तत्रहृदयवल्लभकथाप्रसंगेबालचंद्रिकाकथिततदन्वयनामधेयामन्मथवा
णपतनव्याकुलमानसाविरहवेदनयाबहुलपक्षशशिकलेवक्षामक्षामाहारादिसकलव्यापारंपरिहृत्यरहस्य
मंदिरेमलयजरसक्षालितपल्लवकुसुमकल्पिततल्पतलेतायन्ततनुलताबभूव· तत्रतथाविधावस्थांभजंतीमन्मथानलसंतप्तांसकु

द.श्रा. मारीं॰ कुमारीं निरीक्ष्याविज्ञावयस्यागणः कांचनकलशसंचितानि हरिचंदनोशीरघनसारमिलितानि तदभिषेककल्पितानि सलिलानि
२२ बिसतंतुमयानि वासांसि च नलिनीदलमयानि तालवृंतानि च संतापहरणानि बहूनि संपाद्य तस्याः शरीरमशिशिरयत्॰ तदपि शीतलोपच
22 रणं सलिलमिव तप्ततैले तदंगे दहनमेव समंतादाविश्चकार॰ किंकर्तव्यतामूढां विषण्णां बालचंद्रिकामीषदुन्मीलितेन कटाक्षं वी सि
तेन चाप्यकरुणाकुलेन विलोक्य विरहानलोष्मनिःश्वासग्लपिताधरया नतांग्या शनैः सगद्गदमलापि॰ प्रियसखि कामः कुसुमा
युधः पंचबाण इति नूनमसत्यमुच्यते॰ इयमहमसंख्यैरिषुभिरनेन हन्ये॰ सखि चंद्रमसं वडवानलादतितापकरं मन्ये॰ यदस्मिन्नंतः प्र
विशति शुष्यति पारावारः सति निर्गते तेन दैववद्वर्द्धते॰ दोषाकरस्य दुष्कर्म किं वर्ण्यते मया यदनेन निजसहोदर्याः पद्मालयाया गे
हभूतमपि कमलं हन्यते॰ विरहानलसंतप्तहृदयस्पर्शेन नूनमुष्णीकृतः स्वल्पीभवति मलयानिलः॰ नवपल्लवकल्पितं तल्प
मिदमनंगाग्निशिखापटलमिव संतापं तनोत्लनोति॰ हरिचंदनमपि पुरा निजयष्टिसंश्लेषवदुरगास्यनलिनोत्स्वगरलसंकलि एम.
तमिव तापयति शरीरं॰ तस्मादलमलमायासेन शीतलोपचारेण लावण्यजितमन्मथो राजकुमार एवागदंकारो मन्मथज्वरापहरणे सा २२

पिलब्धुमशक्योमयाकिंकरोमी।तिबालचंद्रिकामनोजज्वरावस्थापरमकाष्ठांगतांकोमलांगींतांराजवाहनलावण्याधीनमानसामनन्य
शक्योमयाकिंकरोमीरणामवेक्ष्यात्मन्यचिंतयत॰ कुमारःसस्मरमानेनत्वोमयानोचेदेनांस्मरणीयांगतिंनयिष्यतिमीनकेतनः तत्रो
द्यानेकुमारयोरन्योन्यावलोकनवेलायामसमसायकः समंमुक्तसायकोऽभूत॰ तस्मात्सुकुमारानयनेस्फुकरे॰ ततोवंतीसुंदरीरक्ष
णायसमयोचितकरणीयचतुरंसखीगणंनियुज्यराजकुमारंस्मिवाप॰ पुष्पवाणवाणतूणीरायमाणमानसोनंगतप्तावयवसंप
र्कपरिम्लानपल्लवशयनमधिष्ठितोराजवाहनः प्राणेश्वरीमुद्दिश्यसहचुम्बोद्भवेनसंलपन्नागतांप्रियवयस्यामालोक्यपारम्भलमन्वे
षणीयालतेववारसचंद्रिकागतेतिसंतुष्टमनाः निरिलतटमंडनीमवदंबुजकोरकाकृतिलसदंजलिपुटामितोनिषीदेतिनिर्दिष्टस
मुचितासनासीनामवंतिसुंदरीप्रेषितंसकर्पूरंतांबूलंविनयेनददतींतांकांताहृत्तांतमपृच्छत॰ तयासविनयमभाणि॰ देवक्रीडा
वनेभवदवलोकनकालमारभ्यमन्मथमथ्यमानापुष्पतल्पादिषुतापशमनमलभवतीवामनेनेवोन्नततरुफलमलभ्यंलदुरः
स्थलालिंगनसौख्यंस्मरांधतयालिप्सुः सास्वयमेवपत्रिकामालिख्यवल्लभायैनामर्पयेतियांनियुक्तवती॰ राजकुमारः पत्रिका

दशा॰ तामादायपपाठ॰ सुभगकुसुमसुकुमारंजगदनवद्यंविलोकितेरूपं॰ ममभानसमभिलषतित्वंचित्तंकुरुतथामृदुलं॰ इतिपठित्वासाद
२३ रमभाषत॰ सखिछायावन्मामनुवर्त्तमानस्यपुष्पोद्भवस्यवल्लभात्वमेवतस्यामृगीदृशोवहिश्चराः प्राणाइववर्त्तसेत्वन्मातुर्यमस्यांक्रिया
23 यामालवालमभूत्॰ तदखिलंकरिष्यामितन्वंग्यामन्मनःकाठिन्यमाख्यातंयदाकेलीवनेकुरंगनयनालोचनपथमवर्त्तततदैवापहृ
तमदीयमानसासास्वमंदिरमगात्॰ साचेतसोमाधुर्यंकाठिन्यंस्वयमेवजानाति॰ दुःकरःकन्यांतःपुरप्रवेशस्तदनुरूपमुपायमुपपा
द्यश्वःपश्चोद्यानतांगीसंगमिष्यामि॰ मदुदंतमेवमाख्यायशिरीषकुसुमसुकुमारायायथाशरीरवाधानजायेततथाविधमुपायमा
चरेति॰ वालचंद्रिकापितस्यप्रेमगर्भितंवचनमाकर्ण्यसंतुष्टाकन्यापुरमगच्छत्॰ राजवाहनोपियत्रहृदयवल्लभावलोकनसुखमल
भततदुद्यानेविरहविनोदायपुष्पोद्भवसमन्वितोजगाम॰ तत्रचकोरलोचनावचितपल्लवकुसुमनिकुरुंवंमहीरुहसमूहंशरदिंदुमु
ख्यामन्मथसमाराधनस्थानंचनतांगीपदपंक्तिचिह्नितंशीतलसैकततलंचसुदताभुक्तमुक्तंमाधवीलतामंडपांतरपल्लवतल्पंचवि एम॰
लोकयनललनातिलकविलोकनवेलाजनितशेषाणिस्मारंस्मारंमंदमारुतकंपितानिनवचूतनपल्लवानिमदनाग्निशिखाइव २३

थकितो दर्शं दर्शं मनोज्ञकर्णेजपानामिव कोकिलकीरमधुकराणां क्वणितानि श्रावं श्रावं मारविकारेण क्वचिदप्यवस्थातुमसहिष्णुः
परिबभ्राम। तस्मिन्नवसरे धरणीसुर एकः सूक्ष्मचित्रनिवसनः स्फुरन्मणिकुंडलमंडितो मुंडिकंमस्तकमानवसमेतस्तत्र वेष
मनोरमो यदृच्छया समागतः समंततोभ्युल्लसन्नेत्रो मंडलं राजवाहनमाशीर्वादपूर्वकं ददर्श। राजा सादरं को भवान्कस्यां विद्या
यां निपुण इति तं पप्रच्छ। स च विद्येश्वरनामधेयोहमैंद्रजालिकविद्याकोविदो विविधदेशेषु राजमनोरंजनाय भ्रमन्नुज्जयिनीम
द्यागतोस्मीति शशंस। पुनरपि राजवाहनं सम्यगालोक्यास्यां लीलावने पांडुरतानिमित्तं किमिति साभिप्रायं विहस्यापृच्छ
त्। पुष्पोद्भवश्चैंद्रजालिके निजकार्यकरणं तर्कयन्नेनमादरेण बभाषे। ननु सतां सरस्वत्या भाषणपूर्वतया चिरं रुचिरभाषणो भ
वानस्माकं प्रियवयस्यो जातः सुहृदामकथ्यं च मे किमस्ति। केलीवनेस्मिन्वसंतमहोत्सवायागतायां मालवेंद्रसुतायां राजनंदनस्या
स्य चाकस्मिकसंदर्शनेन्योन्यानुरागातिरेकः समजायत। सततसंभोगसिद्ध्युपायाभावेनासावीदृशीमवस्थामनुभवतीति। विद्येश्वरो ल
ज्जाभिरामं राजकुमारमुखमभिवीक्ष्य विरचितमंदहासो व्याजहार। देव भवदनुचरे मयि तिष्ठति तव कार्यमसाध्यं किमस्ति। अहमिंद्रजालि

र. कु. विद्ययामालवेन्द्रंमोहयन्नेवराजनन्दनसमक्षमेवतत्तद्यौनेपरिणयंरचयित्वाकन्यांतःपुरंप्रवेशंकरिष्यामीति॰ इत्थंतत एवराजकन्यायैसखीमुखेनपूर्व
२४ मेवकथयितव्यमिति॰ संतुष्टमनामहीपतिरनिमित्तमित्रप्रकटीकृतकृत्रिमक्रियापाटवंविप्रलंभकृत्रिमप्रेमसहजस्नेहाहर्दंवेदिनंतंविद्येश्वरंसब
२५ हुमानंविससर्ज॰ अथराजवाहवाहनोविद्येश्वरस्यक्रियापाटवेनकलितमिवमनोरथंमन्यमानःपुष्पोद्भवेनसहस्वमंदिरमुपेत्यसादरंबाल
चंद्रिकामुखेननिजवल्लभायैमहीसुरक्रियमाणंसंगमोपायंवेदयित्वाकौतुकाकृष्टहृदयःकथमिमांक्षपांक्षपयामीत्यतिष्ठत॰ परेद्युः
प्रभातेविद्येश्वरोरसभावविगीतिरीतिगतिचतुरस्तादृशेनमहतानिजपरिजनेनसहराजभवनद्वारांतिकमुपेत्यदौवारिकनिवेदितनिजवृत्तां
तःसहसोपगम्यसप्रणाममैन्द्रजालिकःसमागतइतिद्वाःस्थैर्विज्ञापितेननतद्दर्शनकुतूहलाविष्टेनसमुत्सुकावरोधसहितेनमालवेंद्रे
णसमाहूयमानोविद्येश्वरःकक्ष्यांतरंप्रविश्यसविनयमाशिषंदत्वातदनुज्ञातःपरिजनताड्यमानेषुवाद्येषुनदत्सुगायकीषुमंद्रकलकाको
किलामंजुलध्वनिषुसमधिकरागरंजितसामाजिकमनोवृत्तिषुपिञ्छिकाभ्रमणेषुसपरिवारपरिवृतंभ्रामयन्मुकुलितनयनःक्षणम
तिष्ठत्॰ तदनुविषमंविषमुल्वणंवमंतःफणालंकरणरत्नराजिनीराजितराजमंदिराभोगाभोगिनोभयंजनयंतोनिश्चेरुः॰ गृध्राश्चबहव राम: २४

स्तैर्डैरहिपतीनाशयद्दिविसमाचरन्० ततोऽग्रजन्मानरसिंहस्यहिरण्यकशिपोर्दैत्येश्वरस्यविदारणमभिनीयमहदाश्चर्यान्वितंराजानम
भाषत· राजन्नवसानसमयेभवताशुभसूचकंद्रष्टुमुचितं· ततःकल्याणपरंपरावाप्त्यैभवदात्मजाकारायास्तरुण्यानिखिललक्षणो
पेतस्यराजनंदनस्यविवाहःकार्यइति· तदवलोकनकुतूहलेनमहीपालेनानुज्ञातःससंकल्पितार्थसिद्धिसंभावनसंफुल्लवदनः
सकलमोहजनकमंजनंलोचनयोर्निक्षिप्यपरितोव्यलोकयत· सर्वेषुतदैंद्रजालिकमेवकर्मेतिसाद्भुतंपश्यत्सुरागपल्लवितहृद
येनराजनकमंजनंलोचनयोर्निक्षिप्यपरितोव्यलोकयत· सर्वेषुतदैंद्रजालिकमेवकर्मेतिसाद्भुवाहनेनपूर्वसंकेतसमागतामनेक
भूषणभूषितांगीमवंतिसुंदरींवैवाहिकमंत्रतंत्रनैपुण्येनाग्निसाक्षीकृत्यसंयोजयामास·क्रियावसानेसतींद्रजालपुरुषाःस
र्वेगच्छंतुभवंतइतिद्विजन्मनोच्चैरुच्यमानेसर्वेमायामानवायथायथमंतर्भावंगताः· राजवाहनोऽपिपूर्वसंकल्पितेनगूढोपाय
चातुर्येणेंद्रजालिकपुरुषवत्कन्यापुरंप्रविवेश०मालवेंद्रोऽपितदद्भुतंमन्यमानस्तस्मैवाडवायप्रचुरतरंधनंदत्त्वाविद्येश्वरम
मिदानींसाधयेतितंविसृज्यस्वयमंतर्मंदिरंजगाम· ततोऽवंतिसुंदरीप्रियसहचरीपरिवारवल्लभोपेतासुंदरीमंदिरंययौ· एवंदैवमानु

द·कु· षवलेनमनोरथसाफल्यमुपेतोराजवाहनः सामसमधुरचेष्टाभिः शनैः शनैर्हरिणलोचनायालज्जामपनयन्करतरागमुपनयन्रहोवि

२५ श्रंभमुपजनयन्संलापेतदनुलापपीयूषलोलुपस्तत्रचित्रंक्रियाहारिणींचतुर्दशभुवनवृत्तांतंश्रावयामास॥ ॥इतिश्रीदंडिनः

25 कृतौदशकुमारचरितेपूर्वपीठिकासमाप्ता॥ ॥संवत१९ ३६ ॥ ॥ ॥ ॥ ॥

एम:
२५